66.

Hodgson

Prayogamukha

ROYAL
ASIATIC
SOCIETY.

66

ROYAL
ASIATIC
SOCIETY.

प्रयोगमुख

ॐ नमः सर्वज्ञाय॥ विज्ञातसकलं ज्ञेयं. येनुत्तीर्णो भवसागरं। प्रणम्य सुगतं सम्य. गुच्यते शब्दशासनं॥ प्रयोगमिद्ध
माख्यातुं. ज्ञेयं कारकमादितः॥ सं तत्पाच्छिविधं भेदा. त्रयोविंशतिधा पुनः॥ तत्र पंचविधः कर्त्ता. कर्म्म सप्तविधं भवेत्। कर
णं द्विविधं चैव. संप्रधानं त्रिधा मतं॥ अपादानं द्विधा चैव. तथाधारश्चतुर्विधः। करोति कारकं सर्वं. तत्स्वातंत्र्यविवक्ष
यात्॥ तत्र कर्त्तर्यभिहिते. प्रथमैव विधीयते। तृतीया चाथ वा षष्ठी. स्मृता नाभिहिते द्विधा॥ तथा कर्म्मण्यभिहिते. विभ १
क्तिं विद्धि पूर्विकां। चतुर्थीं प्रथमां हित्वा. पंचमीसप्तमी तथा॥ तृतीयां पंचमी चैव. षष्ठी च करणे त्रिधा। षष्ठी चतुर्थी
तृतीया. संप्रधाने त्रिधा मता॥ पंचम्यपि चापादाने. वर्त्तिका तत्तोऽन्यथा। सप्तम्येवाधिकरणे. कारकस्यैष संग्रहः॥ स

मासप्तद्विनस्ति. उ. रूत्वात्सोभिधायकाः। तएवानभिसंबन्धाद्भवन्त्यनभिधायकाः॥ षोढा समासः संक्षेपा. दष्टाविं
शतिधा पुनः। नित्यानित्यत्वयोगेन. लुगलुकेन च द्विधा॥ तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः। सप्तधा च बहुव्रीहि. द्वि
गुरा भाषितो द्विधा॥ द्वन्द्वश्चतुर्विधो ज्ञेयो। व्ययीभावो द्विधा मतः। तेषां पुनः समासानां. प्राधान्यं स्याच्चतुर्विधं॥ सामान्या
द्ययभावास्त्रि. रथा विधस्तद्धितो मतः। यदा नान्तु समर्थानां. प्रथमाद्याप्रयुज्यते॥ तिङंचनवपूर्वाद्यं. लादेशाः च परो द्विधा
परस्मैपदमाख्यातं. तदनादात्मनेपदं। परस्मायात्मनेभागे. वचनानि त्रिधा त्रिधा। त्रयस्तेषु पुरुषा ज्ञेयाः प्रथममध्यः
मोत्तमाः॥ एकद्विबहुसंज्ञानि. पदान्येकैकशस्त्रिशः। परस्मैकर्त्तरि ज्ञेयं. न भावेनापि कर्म्मणि॥ आत्मने त्रिषु विज्ञेयं.

प्रयोगमुख
२

भावे कर्म्मणि कर्त्तरि। धातोः कर्म्मकाद्भावे प्रथमैकवचनं भवेत्॥ सकर्म्मकात् कर्म्मकाद्धातोः कर्त्तरि स्मृतमात्मनेपदं तु क
र्म्मणि तु निर्दिष्टं वर्त्तिते तस्य कर्म्मकात्॥ नाम्नैव सन्नियोगे च युष्मदः प्रथमः पुरुषो भवेत्। त्वं युवां यूयमित्येभिः स्त्रिभिरेव तु म
ध्यमः॥ अहमावां वयमित्येभिः उत्तमो नान्यथा मतः। अन्यथानुपहास्ये स्यात् यथा त्वं मन्येऽहं मोदसे॥ कृतस्त्रिष्वपि वर्त्त
न्ते भावे कर्म्मणि कर्त्तरि। अजपत्सुदक्षिणया श्रीभावे पूजकाः एकत्वा॥ सकर्म्मकाकर्म्मकाद्धातोः क्तौ भवेद्भावकर्म्म २
णोः। कृत्याश्चैव खलर्थाश्च तयोरेवानुवर्णिताः॥ त्रिषु गत्यर्थकाद्भिन्नस्तथा चैवापि कर्म्मणि। अकर्म्मकात् समनुत्पत्तौ

मुत्पत्तौ वर्त्तिकर्त्तृभावयोः॥ इत्युक्त्वान्तर्वर्त्तिरित्युत्तरं द्विपस्मरञ्च यावानन्तु गुणानावर्ज्जकं कम्मटटकाश्चैवक
र्त्तरि॥ भावे सोऽन्तरकाले च ल्यपमुत्सुज्य पूर्वकालतः। कर्म्मणि उपमाने षांद्वितीयान्तु विशेषतः॥ वर्त्त
मानेसंनिर्द्देश्यो वर्त्तते शत्तृशानचौ॥ तेषां सत्संज्ञकाख्यानां समासो नैव सिद्ध्यति॥ यन्त्यानादाशयेनादंस्रोका
नां पञ्चविंशतः। परार्थभार सूद्धा दृष्ट्वं भवेयं भवेच्च वा॥ इदानीमेषां संज्ञाकानां विवरणमुच्यते॥ प्रयोगमित्यादि
योयथाविहितं शब्दप्रयोगं क्रियाकारकादिसंसिद्धं ज्ञातुमिच्छति। तेन पुरुषेणादितः प्रथमतः कारकं ज्ञेयं
ज्ञातव्यमित्यर्थः। प्रयुज्यते इति प्रयोगः। अकर्त्तरि च कारके संज्ञायामिति घञ्। घकारस्य जोकुः चि एणनोरिति

प्रयोग मुख

विशेषणार्थः अनेनैव जकारस्य गकारः॥ समासादिकं चैतत्त्व कारकं कति विधं ज्ञेयं। संज्ञया नाम्नां षड्विधं षड्वि

कारकं॥ तत्र कथं कर्त्ता कर्म करणं संप्रदानमपादानमधिकरणं चेति तन्देतत् षड्विधं कारकं। भेदात्त्रयोविंश:

वि तिधा पुनरित्तिकोर्थः भेदाभेदकथनात् नूनं स्तानि षट्कारकानि त्रयोविंशतिधा भवन्ति। त्रयोविंशतिप्रका:

रकाणि भवन्तीत्यर्थः॥ उक्तञ्च॥ तत्र पंचविधः कर्त्ता कर्म सप्तविधं भवेत्। आदितेइतिषु द्विविधं करणं: ३

चैव संप्रदानं त्रिधा मतं॥ अपादानं द्विधा चैव तत्राधारश्चतुर्विधः करोतीति कारकं सर्वं न स्वातन्त्र्यविवक्षया॥:

अर्थारंभादित इति अद्यादिभ्यस्तस्युपसंख्यानमिति तसिप्रत्ययः अनेन रूपेण ह्येतानि षट्कारकानि त्र:

श्र२ श्र२ श्री

योविंशतिप्रकाराणि भवन्तीति ज्ञातव्यं। तत्र पंचविधः कर्त्तेति निर्द्धारणे सप्तमी तत्र कारकाणां मध्ये आदौ ताव

नु पंचविधः कर्त्ता कतमः स्तद्दुव्याने स्वातन्त्र्य कर्त्तादिर्हेतुकर्त्ता कर्मकर्त्ता अभिहितकर्त्ता अनभिहितकर्त्ता चेति॥ त

त्र स्वतन्त्रः कर्त्ता यथा॥ पुरुषः करोति अत्र डुः प्रज्ञात् अज्ञाची वृद्धि भ्योग अणादि अत्र अणप्रत्ययः णकारो वृद्ध्यर्थः॥ य

स्येति अत्यकारलोपः प्रथमैकवचनं सु विसर्गः मेत्रं भजन्ते सन्तः विद्यामुपासते सुकृतिनः अपः प्राप्नुवन्ति द

आत्मेति इत्येवमादीनां स्वतन्त्रः कर्त्तेति कर्त्तसंज्ञा कर्त्तरि लकारो विहितः॥ तेन कर्त्तुरभिहितत्वात् प्रथमा भ

वति अनभिहिते कर्म्मणि अभिहिते नीयाम भवति कर्त्ता किमुच्यते तन्थाद्यो भ्रम्मो षष्ठीकारे णाप्रत्युक्तो च निवर्त्तो च कारक

प्रयोगमुख

नायं स्वस्त्रप्रयत्नः प्रयुक्तो वा सकर्म्मा नाम कारकं स्वतंत्रः कः यस्य क्रियासिद्धौ परोपेक्षां न करोति। स स्वतंत्रः
प्र उच्यते। एतावता स्वतंत्रः कर्त्ता॥ हेतुकर्त्ता यथा॥ हितं लभन्ते विनीताः तानविनीतानहितं लंभंते मानानयोः
प्र धीरः प्रयुंक्ते स हितं लंभयति विनीतानधीरः न यथा तस्य योजको हेतुश्चेति हेतुसंज्ञा चकारात् कर्त्तृसंज्ञा बलमे ४
ष्वाति वृद्धिधावको नु महेतुमति चेति णिचि वर्णना नु लकारः फलसाधनयोग्यः पदार्थो लोके हेतुरुच्यते तस्य
ग्रहणमिह नास्ति कस्मात् स्वतंत्रस्य कर्त्तुः प्रयोजको हेतुरुच्यते॥ कर्म्मकर्त्ता यथा॥ स्वयमेव दृश्यते दुष्टजन
दोषः स्वयमेव लूयते केदारः स्वयमेव छिद्यते पाकृतजनस्नेहः स्वयमेव छिद्यते वृक्षाः स्वयमेव पच्य

फलं कर्म्मवत् कर्म्मणा तुल्यक्रियः इत्यनेन कर्म्मवद्भावनिर्देशात् तत्र भावकर्म्मणोरित्यात्मनेपदं भवति यत्र
स्वयमेवात्मानं छिनत्ति तदा पुनः कर्म्म वासौ कर्त्ता चेति कर्म्मधारयः कथं पुनः कर्म्म भूत्वा कर्त्ता भवति अतः
आह॥ वृक्षं छिनत्ति कश्चित्तदा स वृक्षः कर्म्म भवति स वृक्षः छेदनक्रियायामानुकूल्यं भजमानः स्वातंत्र्येण
विवक्षितो यदा कर्म्मा क्रियाणि कार्याणि प्रतिपद्यते। कर्त्ता भवति विवक्षातः कारकानि भवन्ति यस्य पासौ
कर्म्मत्वापि विवक्षावशात् कर्त्तृसंज्ञां भवति अतस्तु कर्म्मकर्त्ता उच्यते॥ तेन वृक्षस्य कर्म्मविभक्तिर्न भवति
कर्त्तृविभक्तिरेव सदा भवति॥ छिनत्ति अन्यत्र कर्त्तरि समुत्पन्नलकारे णाकर्त्तृत्वमभिहितं भवेत् आत्मिहितेन कः
ति

प्रयोग

र्त्तरि प्रथमा भवति ॥ अभिहिते कर्त्तरि यथा ॥ साधवः परार्थमुत्पादयन्ति शास्त्रमधीते सुधीः ग्रामं गच्छति पथिकः ओद
नं पचति सूपकारः तिङ्कर्त्तर्यभिहिते प्रथमैव भवति नान्या विभक्ति र्भवति अनभिहिते कर्त्तरि यथा ॥ साधुभिः
परार्थमुत्पाद्यते अध्याप्यते धर्म्मं शिष्यो गुरुणा क्रीडज्जीनां णाविति एकारस्याकारः अनभिहिते कर्त्तरि करणे
च तृतीया भवति ॥ कतमत्तत्सप्तविधं कर्म्म ॥ ईप्सितं कर्म्म अनीप्सितं कर्म्म ईप्सितानीप्सितं कर्म्म अकथितं कर्म्म कः ५
र्त्तृकर्म्म अभिहितं कर्म्म अनभिहितं कर्म्म ॥ तत्रेप्सितं यथा ॥ ओदनं भुंक्ते देवदत्तः कटकं गच्छति धावकः ग्रामं गां च
रति सुकृती कर्तुरीप्सिततमं कर्म्म इति कर्म्मसंज्ञा कर्म्मणि द्वितीयेति द्वितीया विभक्ति र्भवति ॥ अनीप्सितं कर्म्मः

यथा ॥ अहिं लंघयति बालकः कण्टकं मर्द्दयति मत्तः विषं भक्षयति क्रुद्धः तथायुक्तं चानीप्सितमिति कर्म्मसंज्ञा कर्म्मणि द्वि
तीयेति द्वितीया ॥ ईप्सितानीप्सितं कर्म्म यथा ॥ पायसमभ्यवहरति पायसमभ्यवहरणे न त्यजति तद्रजोऽप्यभ्यवहरति कुमा
रः बालकोऽविदितत्वात्तद्रजसोपि भक्षणं करोति तेन ईप्सितानीप्सितमुच्यते ॥ अकथितं कर्म्म यथा ॥ गां दोग्धि दुग्धं गो
पालकः राजानं कंबलं याचते ब्राह्मणः व्रजमवरुणद्धि गां गोपालकः उपाध्यायं शास्त्रं पृच्छति शिष्यः ईश्वरं सुवर्णं भि
क्षते द्विजः वृक्षं फलमवचिनोति वनेचरः शिष्यं शास्त्रं ब्रूते पण्डितः पुत्रं शास्त्रमनुशास्ति पिता ॥ अत्रोच्यते दुहि
याचि रुधि प्रच्छि भिक्षि चि आसु प्रयोगनिमित्तमपूर्वविधौ ब्रुविशासि गुणेन च यत्सचते तदकीर्त्तितमाचरितं तकः

प्रयोगमनु

विना॥ अस्यायमर्थः॥ दुहादीनां धातूनां प्रयोगे ऽप्रयोगनिमित्तं यत्कारकं तत्तु अकीर्त्तितं अकथितं कविना शास्त्रकारेण आ
चार्य्येनं कथितं ऽपयुज्यते इत्युपयोगो दुग्धादिः तस्य निमित्तमनुकूलं गवादिरित्युपयोगनिमित्तार्थः॥ अपूर्व्वविधौ पू
र्व्वविधाभावे सति अपादानादिरदित्तस्य कारकस्य कर्म्मसंज्ञा अकथितं चेत्यनेन अपादानादिविशेषसंज्ञाभिर्यन्नकथि
तं तदाकीर्त्तितमित्यर्थः॥ ब्रुविशास्योर्गुणः कारकं कर्म्मस्वरूपमिति यावत् तेनापि यत्संबध्यते तदप्यकथितं॥ कर्त्तृकर्म्म ५
यथा॥ गच्छति ग्रामं देवदत्तः गमयति ग्रामं देवदत्तं यज्ञदत्तः बुध्यते शास्त्रं शिष्यः बोधयति शास्त्रं शिष्यं उपाध्यायः॥
ओदनं भुंक्ते देवदत्तः भोजयत्योदनं देवदत्तं यज्ञदत्तः पठति वेदं माणवकः पाठयति वेदं माणवकमुपाध्यायः॥ अ

अत्ति भक्तमतिथिः आशयति भक्तमतिथिं राजा शेते पतिः शाययति पतिं भार्या॥ गतिबुद्धिप्रत्यवसानार्थः शब्दकर्म्मस
कर्म्मकाणामणिकर्त्ता स णौ॥ अस्यायमर्थः॥ गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्थानां शब्दकर्म्मणामकर्म्मकाणां च धातूनां प्र
योगे॥ अन्यन्तावस्थायां यः कर्त्ता स ण्यन्तावस्थायां कर्म्मसंज्ञको भवतीति तेन देवदत्तादीनां कर्म्मसंज्ञा॥ एषामिति किं पच
त्योदनं सूपकारः॥ पाचयत्योदनं सूपकारेण॥ राजा॥ गत्यर्थेषु मध्ये निवह्योः प्रतिषेधो वक्तव्यः॥ नयति भारं भारिकः ना
ययति भारं भारिकेण साधुः वहति भारं भारिकः वाहयति भारं भारिकेण कृषकः॥ प्रत्यवसानमभ्यवहारः॥ एष्वा
दिखाद्योः प्रतिषेधो वक्तव्यः॥ अत्ति विप्रः आदयति विप्रेण राजा खादति विप्रः खादयति विप्रेण राजा॥ अभिहितं

प्रयोग

कर्म्मयथा॥क्रियतेकटोदेवदत्तेनगृह्यतेभारोभारिकेणओदनःपच्यतेसूपकारेणअभिहितेकर्म्मणिप्रथमाभवति॥ः
अनभिहितंकर्म्मयथा॥ ॥कटंकरोतिनरःदेशान्तरंव्रजतिकार्प्पटिकःकर्त्तुरीप्सिततमंकर्म्मइतिकर्म्मसंज्ञाकः
र्म्मणिद्वितीयेतिद्वितीयाभवति॥कतमद्विविधंकरणं॥ ॥वाह्यमाभ्यन्तरंचेतितत्रवाह्यंयथा॥दात्रेणधान्यंलुनातिकः
श्री
र्षकः।कुठारेणकाष्ठंछिनत्तिवार्द्धकिः॥आभ्यन्तरंयथा॥ ॥चक्षुषारूपंपश्यतिमनुष्यःस्वरेणजानातिपुत्रंपिताः
मनसागच्छतिहरिसेवांमनसायातिपुत्रंगच्छतिवालकःसाधकतमंकरणमितिकरणसंज्ञाकर्त्तृकरणयास्तृतीयेतितृ
तीयाभवति॥शरीरावयवादतिरिक्तंवाह्यं॥कतमत्त्रिविधंसंप्रदानं।प्रेरकमानुमंत्रिकमनिराकर्त्तृकंचेति॥तत्रप्रे

रकंयथा॥ ॥ब्राह्मणायगांददातिधार्म्मिकः।सहिब्राह्मणंधार्म्मिकसाधमह्यंगांदेहीतिप्रेरयतिअतःप्रेरकं॥आनुमंः
त्रिकंयथा॥अतिथयेफलमूलंददातितपोधनःसह्यतिथिःफलमूलार्थंतपोधनंप्रेरयतिदत्तंचानुमन्यतेअतअनु
मंत्रिकमुच्यते।फलानिचमूलानिचचार्थेद्वन्द्वइतिद्वन्द्वसमासः॥जातिरप्राणिनामित्येकवद्भावः॥अनिराकर्त्तृकंय
था॥चैत्यायपुष्पंददातिबौद्धःसचैत्यःमह्यंदेहीतिनतंप्रेरयतिनचदीयमानमनुमन्यतेनोवानिराकरोतितस्माद
निराकर्त्तृकमुच्यतेकर्म्मणायमभिप्रैतिससंप्रदानंइतिसंप्रदानसंज्ञा.संप्रदानेचतुर्थीतिचतुर्थीभवति॥कतमः
द्विविधमपादानंचलमचलंचेति॥तत्रचलंयथा॥धावतोश्वात्पतितोश्ववाहकःधावतोहस्तिनःपतितोहस्त्यःव

प्रयागमु

रोहकः॥ अचलं यथा॥ ग्रामादागच्छतिपथिकः पर्वतादवरोहन्तिमुनयः। ध्रुवमपायेअपादानमित्यपादानसंज्ञा अपाः
दानेपंचमीकिमपादानं अपायेयदुपादानंचलवायदिवाचलं। ध्रुवमेवतदावेशात्तदपादानमुच्यते॥ प्रासादात्
प्रेक्षतेप्रासादमवरुह्यप्रेक्षतइत्यर्थः। ल्यप्लोपेकर्मणि। पंचमीवक्तव्या। पतितइतिद्वितीया श्रितातीतपतितइत्यादि
निर्देशादिदंअन्यथायस्यविनाशेतीत्प्रतिषेधःस्यात्॥ कतमंचतुर्विधमधिकरणं॥ अभिव्यापकमौपश्लेषि ८
कंवैषयिकंसामीप्यकंचेति॥ तत्राभिव्यापकंयथा॥ तिलेषुतैलंतिष्ठतिदध्निसर्पिस्तिष्ठतिकायेरुधिरमास्ते॥
औपश्लेषिकंयथा॥ कटेआस्ते वृक्षेतिष्ठन्तिशकुनयः आसनेतिष्ठतिराजा औपश्लेषिकस्यायमर्थःउपः

श्लिष्यतइत्युपश्लेषः एकदेशाश्रयत्वात् औपश्लेषिकमुच्यते व्यापकं अभिव्यापकेनसहसर्वत्रसंबन्धः सर्वंव्याप्नोती
त्यभिव्यापकं॥ वैषयिकंयथा॥ वनेवसन्तिसिंहाः जलेमत्स्याः सन्तियोयत्रप्रनीयतेतेनवैषयिकं वनंविषयीकृत्यतिष्ठन्ती
त्यर्थः॥ सामीप्यकंयथा॥ गंगायांघोषःप्रतिवसतिगुरौशिष्यःप्रतिवसति। णासुअनुशिष्टौएतिसुशास्त्रइजुषःका
पशासइदंहलोरितिआकारस्यइकारः॥ समीपंनिकटंतत्रभवःसामीप्यकं। गंगासमीपेघोषःप्रतिवसतीत्यर्थः॥ आ
धारोअधिकरणमित्यधिकरणसंज्ञा सप्तम्यधिकरणेचेतिसप्तमी॥ यदिचकरोतीतिकारकमन्वर्थसंज्ञेयंविज्ञायते
तर्हियःकरोतिसएवपरंकर्त्तास्यात्तदाकर्त्तुरेवकारसंज्ञांप्राप्नोतिनचकर्मादीनांकुतः यतोअमीव्यापारंन

प्रयोगमु

कुर्व्वन्ति कथमेषां कारकत्वं भविष्यति। अत्रोच्यते सर्व्वान्येतानि कर्म्मादीनि कुर्व्वन्त्येव कुत इत्याशंकाह तत्स्वातंत्र्यविवक्ष
यायामेतेषां कारकाणां स्वतंत्रताविवक्षा तेन दानान्यपि कर्म्माणि कुर्व्वन्त्येव यदि प्रतिकारकं स्वातंत्र्यविवक्षा क्रियते तत्
३ द्विवक्षायां सत्यां सिद्धं सर्व्वेषामेव कारकत्वं यथा स्थाली पचति अग्निः पचति काष्ठानि पचन्ति स्वक्रियां प्रति सर्व्वेषां कारकाणां
स्वातंत्र्यं सिद्धान्तान्तरमाह किं च कारकाधिकारे कारकशब्दो निमित्तपर्य्यायः निमित्तं हेतुः कारणं कारकमिति तेन काष्ठैरो ३
दनं पचतीत्यत्र काष्ठस्य क्रियां प्रति निमित्तता भवत्येव।। तत्र कर्त्तर्य्यभिहिते प्रथमैव विधीयते इति को ऽर्थः तत्र षट्कारके
कर्त्तर्य्यभिहिते प्रथमैव विधीयते।। तद्यथा।। पचत्योदनं सूपकारः कटं करोति नरः अभिहिते कर्त्तरि प्रथमैव भवति।। त्वन्नीया

चाथवा षष्ठी स्यात् अनभिहिते द्विधेति को ऽर्थः अनभिहिते कर्त्तरि द्विविभक्तीर्भवतः तृतीया षष्ठी च तत्र तृतीया यथा ओदनः
पच्यते सूपकारेण क्रियते कटो देवदत्तेन अनभिहित इत्यधिकृत्य कर्त्तृकरणयोस्तृतीया अनभिहिते कर्त्तरि करणे वा तृतीयैव
भवति।। षष्ठी यथा।। कटः कर्त्तव्यो देवदत्तस्य देवदत्तेन वा परलोकजीतस्य सेवितव्यो धर्म्मः परलोकजीतेन वा गन्तव्यो ग्रा
मो देवदत्तस्य देवदत्तेन वा ओदनः पक्तव्यः सूपकारस्य सूपकारेण वा पयः पेयं पोतस्य पोतेन वा कार्य्यः कटो देवदत्तस्य
देवदत्तेन वा तयोरेव कृत्यक्तखलर्थाः इत्यनुवर्त्तमाने तव्यतव्यानीयरः। इति तव्यतव्यानीयरः प्रत्ययाः पेयमित्यत्र
अचो य इति यत्प्रत्ययः कार्य्य इत्यत्र ऋहलोर्ण्यत् स्या इति तव्यतव्यानीयरण्यत्कायपयेषां तव्यादीनां कृत्याः प्राङ्ण्वुल इति

प्रयोगमु

कृत्यासंज्ञाकृत्यानांकर्त्तरिवेतिविकल्पेनषष्ठीपक्षेतृतीयावापेयमित्यत्रईद्यतीत्याकारस्यईकारःगुणश्च॥तथाकर्म्म
ण्यभिहितेविभक्तिंविद्धिपूर्व्विकामितिकोर्थः।यत्रकर्त्तर्य्यभिहितेप्रथमाभवतितथाकर्म्मण्यभिहितेपूर्व्विकाविभक्तिंप्रथ
डे मांविद्धिजानीहि॥तद्यथा॥पच्यतेओदनःसूपकारेणक्रियतेकटोमनुष्येणह्रियतेभारोभारिकेन॥कर्म्मण्युत्पन्नेल १
कारेणकर्म्मणोऽभिहितत्वान्नाभिहितेकर्म्मणिप्रथमाविभक्तिर्भवतीतिप्रथमाअनुक्तेप्रथमांहित्वापंचमीसप्तमीः
तयेतिकोर्थः।अनुक्तेऽनभिहितेकर्म्मणिप्रथमीयंचमीसप्तमीर्व्वर्जयित्वान्यत्काशेषाश्चतस्रोविभक्तयोभवन्तिद्वि
तीयातृतीयाचतुर्थीषष्ठीचेतितत्रद्वितीयायथा॥ग्रामंगच्छतियापकःशास्त्रंशृणोतिपण्डितः।कर्म्मणिद्वितीयेतिद्विः

तीया॥तृतीयायथा॥पुत्रेणसंजानीतेपिता॥मात्रासंजानीतेपुत्रःमातरंसंजानीतेतदर्थःसंज्ञोन्यतरस्यांकर्म्मणिसंपूर्व्वा
ज्जानातेर्ज्ञोनोःकारकेतृतीयाभवत्यन्यतरस्यांविकल्पेनद्वितीयावासंप्रतिभ्यामनाध्यानेइत्यात्मनेपदं॥चतुर्थीयथा॥
ग्रामंगच्छतिग्रामायगच्छतिनगरंगच्छतिनगरायगच्छतिगत्यर्थकर्म्मणिद्वितीयाचतुर्थ्यौचेष्टायामनध्वनिइतिद्विती
याचतुर्थ्यौभवतः॥षष्ठीयथा॥कटस्यकारकोदेवदत्तःभारस्यहारकोयज्ञदत्तःकर्तृकर्म्मणोःकृतीतिषष्ठी॥तृतीयापं
चमीचैवषष्ठीचकरणेत्रिश्चेतिकोर्थःअनभिहितेकरणेकारकेतृतीयापंचमीषष्ठीचेतितिस्रोविभक्तयोभवन्तितत्र
तृतीयायथा॥कुठारेणकाष्ठंछिनत्तिवर्द्धकिःदात्रेणधान्यंलुनातिकृषकःकर्तृकरणयोस्तृतीयेतितृतीया॥पंचमीय
व

योगसु

था॥स्तोकान्मुक्तः अल्पान्मुक्तः कृच्छ्रान्मुक्तः कतिपयान्मुक्तः करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य इति पंच
मी स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेनेति समासः समासे सुपो धातुप्रातिपदिकयोरिति सुपो लुकि प्राप्ते अलुगुत्तरपदे
इत्यधिकृत्य पंचम्याः स्तोकादिभ्य इति पंचम्या अलुक् असत्ववचनस्येति किं स्तोकेन विषेण हतः॥षष्ठी यथा॥घृतस्य
संजानीते मधुनः संजानीते ज्ञोविदर्थस्य करणे इति षष्ठी। षष्ठी चतुर्थी तृतीया संप्रदाने त्रिधा मते कोर्थः॥ऽनभिहिते का
रके संप्रदाने षष्ठी चतुर्थी तृतीयास्तिस्रो विभक्तयो भवन्ति तत्र षष्ठी यथा॥पुरुषमृगश्चन्द्रमसो देयः पुरुषमृगः पुरु
षश्रेष्ठः श्रेष्ठश्चन्द्रमसे वदेणा दातव्य इत्यर्थः चतुर्थ्यर्थे बहुलं छन्दसीति संप्रदाने कारके षष्ठी॥चतुर्थी यथा॥ब्राह्मणाय ११

भिक्षां ददाति धार्मिकः उपाध्यायाय गां ददाति राजा संप्रदाने चतुर्थी इति चतुर्थी भवति॥तृतीया यथा॥दास्या मालां संय
च्छते दास्यै मालां ददातीत्यर्थः दानदाने पाघ्रादिना यच्छादेशः दाणसाश्चेच्चतुर्थ्यार्थे इत्यात्मनेपदं अशिष्टव्यवहारे चतु
र्थ्यर्थे तृतीया वक्तव्या इति तृतीया॥पंचम्यपादाने वर्त्तते न तत्रान्यर्थ इति कोर्थः अपादाने कारके पंचमी भवति नान्यः
थान यथा पर्व्वतादवरोहन्ति मुनयः ग्रामादागच्छति पथिकः ध्रुवमपाये अपादानेमित्यपादानसंज्ञा अपादाने पंचमी
ति पंचमी विभक्तिर्भवति सप्तम्यधिकरणे कारकस्य संग्रह इति कोर्थः अधिकरणे कारके सप्तमी भवति यथा
मे वसन्ति मानवाः नगरे तिवसन्ति विप्राः आधारोऽधिकरणमित्यधिकरणसंज्ञा सप्तम्यधिकरणे चेति सप्तमी॥अ

यदि आत्मप्रदर्शनार्थं कारकसंयुक्तः विशेषादिकं च वृत्त्यादिषु बोद्धव्यं ॥ अनभिहितानभिहितयोः स्वरूपं कथितं के
पुनस्ते इत्याह दंडादंडि युद्धं वृक्षेलगुडालगुडि युद्धं किलाकिलि युद्धं ॥ नत्र तेनेदमिति सरूप इति समासः अन्येषामपि दृश्यते इ
ति पूर्वपदस्य दीर्घत्वं द्वंद्वकर्मव्यतीहार इति द्वंद्वसमासान्तः यस्येति अकारलोपः तिष्ठद्गुप्रभृतीनि चेति तिष्ठद्गुप्र १२
भृतयः अव्ययत्वं तेनाव्ययादाप्सुप इति सुपो लुक ॥ दिगन्तराललक्षणे यथा ॥ पूर्वस्याश्च दक्षिणस्याश्च दिशोर्यदन्तरालं सेयं
पूर्वदक्षिणादिक दक्षिणस्याश्च पश्चिमायाश्च दिशोर्यदन्तरालं सेयं दक्षिणपश्चिमादिक पश्चिमायाश्च उत्तरस्याश्च दि
शोर्यदन्तरालं सेयं पश्चिमोत्तरादिक उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सेयं उत्तरपूर्वादिक का दिगमन्यान्तराल इति स

८१

मासः सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्य इति पुंवद्भावः पूर्वपदस्य पुंवद्भावान्न टापो निवृत्तिः ॥ द्विगुरन्याषितेति द्वि चेति
कोयं द्विगुः समासो द्विधा विज्ञेयः एकवद्भावी अनेकवद्भावी चेति तत्र एकवद्भावी यथा ॥ त्रीणि शृंगाणि समाहृतानि त्रिशृं
गी पंचपूलाः समाहृता इति पंचपूली दशमूली ॥ तद्धितार्थोत्तरपदसमाहारे चेति समासः संख्यापूर्वो द्विगुरिति द्वि
गुसंज्ञा द्विगुरेकवचनमित्येकवद्भावः स नपुंसकमिति नपुंसकत्वे प्राप्ते अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत इ
ति स्त्रीत्वं द्विगोरिति ङीप ॥ अनेकवद्भावी यथा ॥ पंचपूली च पंचपूली च पंचपूली च पंच पूल्यः चतस्रो दिशः चतुर्दिशः
त्रयो लोकाः त्रिलोकाः दिक्संख्ये संज्ञायामिति समासः त्रिचतुरोः स्त्रियां तिसृचतसृ इति तिसृ चतसृ आदेशाः सप्तपाणामे

करोषस्य कविभक्तो ह्येककरोषः ॥ द्वन्द्वस्त्वनुर्विधो ज्ञेय इति कोऽर्थः द्वन्द्वसमासस्त्वनुर्विधो भवति समुच्चयोऽन्वाचय इतरे-
तरयोगः समाहारश्चेति । तत्र समुच्चयान्वाचययोरसामर्थ्यान्न समासो भवति समर्थः पदविधिरिति वचनात् । समु-
च्चये यथा ॥ भिक्षामट गां चानय यदि भिक्षाटने गां न पश्यसि तदा नाभ्यानयषासि ॥ समुच्चये यथा ॥ गामश्वं पुरुषं प-
शुमहरहर्नयमानो वैवस्वतस्तृप्तिं न याति ॥ इतरेतरयोगो यथा ॥ देवदत्तश्च यज्ञदत्तश्च देवदत्तयज्ञदत्तौ धवश्च पला- १२
शश्च खदिरश्च धवखदिरपलाशाः ब्राह्मणश्च क्षत्रियश्च वैवस्वतस्तृप्तिं न याति ॥ इतरेतरयोगो यथा ॥ देवदत्तश्च य-
ज्ञदत्तश्च देवदत्तयज्ञदत्तौ धवश्च पलाशश्च खदिरश्च धवखदिरपलाशाः ब्राह्मणश्च क्षत्रियश्च वैश्यश्च शूद्रश्च

अभिधायकाः कारकाणां अनभिधायका वा केऽद्यन्ते अनस्माद् ॥ समासतद्धितस्तिङ्कृच्चत्वारस्तेऽभिधायकाः । तत्र वान-
भिसंबन्धाभवं त्वनभिधायका इति कोऽर्थः यदा तैः समासादिभिः सह ते कर्तृकर्मादयः साक्षात्संबन्धमनुभवन्ति तत्रै-
वऽन्ययन्ते तदा ते समासादयस्तेषां कर्मादीनामभिधायका भवन्ति । यद्येवं न तदा अनभिधायकाः केयदा ते एव समा-
सादिभिः सह ते कर्तृकर्मादयः संबन्धं नानुभवन्ति नोच्यन्ते तदा तेषां अनभिधायका भवन्तीति बोद्धव्यं । अथ वि-
शेषतश्चाने ॥ यस्मै सम्यक् दीयते तेन तत् संप्रदानमित्युक्तं तेनेह न भवति युवानः पृष्ठं ददाति रजकस्य वस्त्रं ददाति । इ-
ह प्रजानुग्रहेच्छया स्वद्रव्यपरित्यागो दानमभिप्रेतं तदा हस्वसत्त्वनिवृत्तिः परस्वोत्पत्तिर्दानं तच्चेह नास्तीति न संब-

उ॰
त्रि

न्वमात्रे षष्ठी वा भवति यस्मै क्रुध्यति तदपि संप्रदानं देवदत्ताय क्रुध्यति शत्रवे द्रुह्यति भार्यायै ईर्ष्यति असूयति असू क्षेपणे कंड्वा
दिभ्यो यक इति यक क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप इति संप्रदानसंज्ञा चतुर्थी संप्रदाने इति चतुर्थी क्रुधद्रुहोरुप
सर्गयोः प्रयोगे यं प्रति कोपस्तत्कारकं कर्मसंज्ञं भवति पूर्वस्य संप्रदानस्यापवादः देवदत्तमनुक्रुध्यति देवदत्तम १३
भिद्रुह्यति क्रुधद्रुहोरुपसृष्टयोः कर्मेति कर्मसंज्ञा कर्मणि द्वितीयेति द्वितीया पुत्राय अपराध्यति स्त्रीभ्य ईक्ष्यति रा
धीक्ष्योर्यस्य विप्रश्न इति संप्रदानसंज्ञा नावरदायरोचनेकल्पदः रुच्यर्थानां प्रीयमाण इति संप्रदानसंज्ञा॥ ॥
यस्मादपायस्तदपादानं यस्मादपगच्छति यत्न तिक्रान्तिष्ठति वलस्थानेन तदपादानं यस्माद्बिभेति त्रायते तदप्यपादानमुक्तं चौराद्बिभेति

साधुः सिंहाद्बिभेति वनेचरः सिंहात्त्रायते सिंहादुद्वजति भीत्रार्थानां भयहेतुरित्यपादानसंज्ञा अपादाने पंचमीति पंचमीः
भवति। यस्माद्वार्यते तदप्यपादानं अविनयान् पुत्रं वारयति पिता वारणार्थानामीप्सितमित्यपादानसंज्ञा अपादाने पंचमी य
स्मादन्तर्धीयते तदप्यपादानं उपाध्यायादन्तर्धीयते शिष्यो न स्वजनादन्तर्धीयते कुजनः अन्तर्धौ येनादर्शनमिच्छतीत्यपा
दाने पंचमी॥ यस्मादधीयते तदप्यपादानं उपाध्यायादधीते वेदं ब्राह्मणः रामादधीते सन्देशं आख्यातोपयोग इत्यपादान
संज्ञा अपादाने पंचमी यस्मात् प्रभवति तदप्यपादानं हिमवतो गंगा प्रभवति भुवः प्रभव इत्यपादानसंज्ञा अपादाने
पंचमी यस्माज्जायते तदप्यपादानं काष्ठाज्जायते वह्निः जनिकर्तुः प्रकृतिरित्यपादानसंज्ञा अपादाने पंचमीति पंच

मीभवति ॥ यस्मिन्नस्थीयते तदधिकरणं ॥ अधिपूर्व्वाणां शीङ्स्थासां कर्म्म भवति ॥ तद्यथा ॥ शय्यामधिशेते ग्रासमध्यास्ते पात
लमधितिष्ठति अधिशीङ्स्थासां कर्म्म ॥ अधिपूर्व्वाणां शीङ्स्थासां धातूनां य आधारः सं कर्म्मसंज्ञो भवति कर्म्मण्येव द्वितीये
ति द्वितीया ॥ अभिनिपूर्व्वाद् विशतेर्य आधारः स कर्म्म भवति नगरमभिनिविशते ग्राममभिनिविशते अभिनिविशते
अभिनिविशतेश्चेति कर्म्मसंज्ञा कर्म्मणि द्वितीयेति द्वितीया नेर्विशः इत्यात्मनेपदं ॥ उपान्वध्याङ्वसः ॥ उपादिपूर्व्वस्य
वसतेर्य आधारः स कर्म्मसंज्ञो भवति ग्राममुपवसति नदीमनुवसति गिरिमधिवसति अटवीमावसति अपरं वक्तव्यविशेष
णं द्रष्टव्यं ॥ इति प्रयोगमुखे कारकपटलं संपूर्णं ॥ ॥ कारकपटलमभिधाय समासपटलमनुवर्णयिष्यामः तत्र ॥ १४

षोढा समासः संक्षेपादष्टाविंशतिधा पुनरिति कोऽर्थः ॥ समासः षोढा षट्प्रकारको भवति केन प्रकारेण भवतीत्यत आह ॥
तत्पुरुषः कर्म्मधारयः द्विगुः द्वन्द्वः बहुव्रीहिः अव्ययीभावश्चेति विस्तरेण पुनरष्टाविंशधा भवति यस्यापदस्य विभागं
वक्ष्यामः इदानीं प्रकृतमेवोच्यते तदेवाह नित्यानित्यत्वयोगे नलुग्लुक्त्वे पुनर्द्विधेति कोऽर्थः द्विधा समासो भवति नित्य
समासो ऽनित्यसमासश्चेति लुकसमासो ऽलुकसमासश्चेति नित्यानित्यत्वधर्म्मेन तस्यादित्वं लुगलुक्त्वे न चेति तत्र नित्यस
मासो यथा ॥ निर्व्वर्त्यं कुम्भं करोति कुम्भकार त्रिविधं कर्म्म भवति निर्व्वर्त्यं विकार्यं नगरं करोति नगरं न तु कपामस्य नित्यता
यावतामहाविभाषापरत्वामनुवर्त्तते तेन तस्यापाक्षिकत्वमेव कपामस्यानित्यत्वमिति काण्डं लुनाति काण्डलावः शरं लुनाति शरलावः

पंवेदाध्यायः कर्म्मण्यणाडुत्यणाप्रत्ययः अत्रैवाग्निनीति वृद्धि अत्रोच्यते नित्यं क्रीडाजीविकयोरित्यनुवर्त्तमाने उपप
दमतिङिति समासः तस्मात्तत्रोपपदं सप्तमीस्थमित्युपपदसंज्ञा सच गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सु
बुत्पत्तेरिति उपपदसमासः सुबुत्पत्तेः प्रागेव भवतीति तदुक्तं नित्यसमासानां विग्रहो न भवतीति वाक्यस्यानुपपत्त्वान्नित्य
समासः यदि च विग्रहः क्रियते तदान्यपदान्तरेण सह कर्त्तव्यः समासे सति सुपो धातुप्रातिपदिकयोरिति सुपो लु
क् प्रथमानिर्दिष्टं समास उपसर्ज्जनं समासे समासशास्त्रे प्रथमया विभक्त्या यन्निर्दिष्टं तदुपसर्ज्जनसंज्ञं भवति उपस
र्ज्जनं पूर्व्वं यदुपसर्ज्जनसंज्ञं तत्पूर्व्वं निपततीति कुम्भशब्दस्य पूर्व्वनिपातः तेन कुम्भकार इति भवति नकारकुम्भ इति॥

राज्ञः पुरुष इत्यत्र वाक्ये राजपुरुषो भवति न पुरुषराज इति यदि च नित्यसमासोऽयं तत्कथं कुम्भं करोतीति वाक्यं क्रियत्ते
नैष दोषः अर्थप्रदर्शनार्थं यथा स्त्रियमतिक्रान्तः कथा प्रवर्त्तते अतिस्त्रि अतिकुमारि सन्नपुंसकमिति नपुंसकसंज्ञा ह्रस्वो
नपुंसके प्रातिपदिकस्येति ह्रस्वत्वं॥ अनित्यसमासो यथा॥ राज्ञः पुरुषो राजपुरुषः स्वस्वामिसंबन्धे षष्ठी षष्ठीत्यनेन
समासः पशोः पादः पशुपादः अवयवावयविसंबन्धे षष्ठी पितुः पुत्रः पितृपुत्रः जन्यजनकसंबन्धे षष्ठी महाविभा
षाधिकाराद्धि क्वचिन्नेन समासः अनेनायमनित्यसमास इत्युच्यते लुक्समासो यथा। कष्टं श्रितः कष्टश्रितः। स्तुकं श्रि
तीतीत्यप्रतिषेधः। कान्तारमतीतः कान्तारातीतः नरकं पतितो नरकपतितः ग्रामं गतो ग्रामगतः तरंगमत्यस्तः तरं

१९ ठे प्र

गणिस्त्तः सुखंप्राप्तः सुखप्राप्तः दुःखमापन्नः दुःखापन्नः द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति समा
सः। विभक्तिलोपः पूर्ववत्तनन्तुच पतिनिदन्त्यत्र यस्य विभाषाद्इतीट्प्रतिषेधेन भवितव्यमतस्य एव निपातनात्समासाः
नाम्ननुकसमासो यथा। कण्ठेकालो यस्य स कण्ठेकालः उरसिलोमानि यस्य स उरसिलोमा कण्ठेगडुर्यस्य स कण्ठेगडुः।
अनेकमन्यपदार्थे इति समासः सुपो धातुप्रातिपदिकयोरिति सुपो लुकि प्राप्ते अलुगुत्तरपदे इत्यधिकृत्य अमूर्द्धमस्त
कात्स्वाङ्गादकामे इति सप्तम्या अलुक। तत्राष्टधा तत्पुरुषः इति कोर्थः प्रथमातत्पुरुषः द्वितीयातत्पुरुषः तृतीयातत्पुरु
षः चतुर्थीतत्पुरुषः पंचमीतत्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषः नञ्तत्पुरुषश्चेति। तत्र प्रथमातत्पुरुषो यः १८

था। पूर्वं कायस्य पूर्वकायः अपरं कायस्य अपरकायः अधरं कायस्य अधरकायः उत्तरं कायस्य उत्तरकायः पूर्वापराधरो
त्तरमेकदेशिनैकाधिकरणे इति समासः षष्ठीसमासे प्राप्ते वचनमिदं सिद्धसन्यारंभो नियमार्थस्तेन पूर्वापराधरोत्तरैः स्य
थमातत्पुरुष एवं। अर्द्धं पिप्पल्याः अर्द्धपिप्पली अर्द्धं रजन्याः अर्द्धरजनी अर्द्धं नपुंसकमिति समासः। द्वितीयं भिक्षा
याः द्वितीयभिक्षा भिक्षाद्वितीयं वा तृतीयं भिक्षायाः तृतीयभिक्षा भिक्षातृतीयं वा चतुर्थं भिक्षायाः चतुर्थभिक्षाः
भिक्षाचतुर्थं वा तुर्यं भिक्षायाः तुर्यभिक्षाः भिक्षातुर्यं वा द्वितीय च तुर्थ तुर्याण्यन्यतरस्यामिति समासः द्विती
यत्रेः संप्रसारणं चतुर्थे इत्यत्र कतिकतिपयचतुरां थुगिति॥ थुक्प्रत्ययः तुर्य इत्यत्र चतुरस्राद्यानुच्चतुरस्छयत

वाद्यक्षवलोपश्चेतियनप्रत्ययः आद्यक्षरलोपश्चेति अन्यतरस्यांग्रहणसामर्थ्यात्पक्षे षष्ठीसमासोऽपि भवति अयं तु विशे
षः षष्ठीसमासे षष्ठ्याः प्रथमान्तत्वात्पूर्वनिपातः प्राप्तो जीविकां प्राप्तजीविकः आपन्नो जीविकां आपन्नजीविकः प्रा
प्तापन्ने द्वितीयया चेति समासः ननु चात्र कथं प्रथमा तत्पुरुष उच्यते पूर्वपदस्य प्रथमान्तत्वात् पूर्वपदस्तु यथा प्र
थमया विशेषितत्वात् प्रथमा तत्पुरुष उच्यते उपसर्जनं पूर्वमिति पूर्वनिपातः ॥ द्वितीयातत्पुरुषो यथा ॥ वृक्षं १
श्रितः वृक्षाश्रितः कान्तारमतीतः कान्तारातीतः स्वर्गं पतितः स्वर्गपतितः ग्रामं गतो ग्रामगतः तुरंगमत्यस्तः तु
रंगात्यस्तः सुखं प्राप्तः सुखप्राप्तः दुःखमापन्नः दुःखापन्नः द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति

समासः वर्षं भोग्यः योजनं प्रविततः क्रोशं कुटिला नदी क्रोशकुटिला नदी कालाध्वनोरत्यन्तसंयोगे इति द्वितीया
अत्यन्तसंयोगे चेति समासः ॥ तृतीयातत्पुरुषो यथा ॥ शंकुलया खण्डः शंकुलाखण्डः तृतीया तत्कृतार्थेन गु
णवचनेनेति समासः मासेन पूर्वः मासपूर्वः गुणेन सदृशः गुणसदृशः पित्रा समः पितृसमः चतुर्थेन ऊनः चतु
र्थोनः वाचा कलहः वाक्कलहः वाचा निपुणः वाङ्निपुणः गुडेन मिश्रः गुडमिश्रः वाचा श्लक्ष्णः वाक्श्लक्ष्णः पूर्वसदृ
शसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैरिति समासः समर्थग्रहणात् किं त्वं करिष्यसि शंकुलेन खण्डो देवदत्तेन उपात्तेन असाम
र्थ्यात् समासो न भवति ॥ चतुर्थीतत्पुरुषो यथा ॥ यूपाय दारु यूपदारु कुण्डलाय हिरण्यं कुण्डलहिरण्यं [illegible]ायवः

निःस्यन्त्वावनिः ब्राह्मणाय हितं ब्राह्मणहितं ब्राह्मणाय सुखं ब्राह्मणसुखं विप्राय रक्षितं चतुर्थी तदर्थार्थबलिहितसु
खरक्षितैरिति समासः॥समर्पयद्दनं किं गच्छत्वं यूपाय दद्विदे वदत्तस्यागृहे॥पंचमीतत्पुरुषो यथा॥वृकेभ्यो भ
यं वृकभयं सिंहाद्भयं सिंहभयं चौराद्भयं चौरभयं पंचमी भयेनेति समासः अर्थादपेतः अर्थापेतः सुखादपोढ
सुखापोढः स्तोकान्मुक्तः स्तोकमुक्तः नगरान्निर्गतः नगरपतितः वृक्षादपत्रस्तः वृक्षापत्रस्तः अपेतापोढ
मुक्तपतितापत्रस्तैरल्पशः इति समासः समर्पयद्दत्तां किं गच्छत्वं वृकेभ्यो भयं तिष्ठति देवदत्तस्य यज्ञदत्तात्॥षष्ठी
तत्पुरुषो यथा॥वृक्षस्य फलं वृक्षफलं पशोः पादः पशुपादः पितुः पुत्रः॥षष्ठीत्यनेन समासः ब्राह्मणस्य

याजकः ब्राह्मणयाजकः क्षत्रियस्य याजकः क्षत्रिययाजकः तृजकाभ्यां कर्तरि यौ विहितौ तृजकौ ताभ्यां षष्ठ्या न समा
स्यत इति प्रतिषेधे प्राप्ते याजकादिभिश्चेति समासः॥सप्तमीतत्पुरुषो यथा॥अक्षेषु शौण्डः अक्षशौण्डः सप्तमी शौ
ण्डैरिति समासः॥पाटलिपुत्रे सिद्धः पाटलिपुत्रसिद्धः आतपे शुष्कः आतपशुष्कः वृक्षेषु पक्वः वृक्षपक्व
ः कावेषु बन्धः कावबन्धः सिद्धशुष्कपक्वबन्धैश्चेति समासः॥नञ्तत्पुरुषो यथा॥न ब्राह्मणः अब्राह्मणः न स्त्री
न स्त्री अस्त्री न उक्तं अनुक्तं अजादौ नुन् तस्मान्नुड् इति नञ् नित्यानेन समासः॥कतमः सप्तधा कर्म्मधारयः।
विशेषणपूर्वपदः विशेषणोत्तरपदः विशेषणोभयपदः उपमानपूर्वपदः उपमानोत्तरपदः संभावना

पूर्व्वपदः अवधारणापूर्व्वपदश्चेति तत्र विशेषणपूर्व्वपदो यथा। नीलं च तदुत्पलं चेति नीलोत्पलं रक्तं च तदुत्प
लं चेति रक्तोत्पलं विशेषणं विशेष्येण बहुलमिति समासः महांश्चासौ देवश्चेति महादेवः। सन्महत्परमोत्तमो
त्कृष्टाः पूज्यमानैरिति समासः आन्महतः समानाधिकरणजातीययोरिति नकारस्यात्वं॥ विशेषणोत्तरपदो यथा॥ १९
वैयाकरणश्चासौ खसूचिश्चेति वैयाकरणखसूचिः कुत्सितानि कुत्सनैरिति समासः॥ पापेणषष्ठः सनखमाः
काशंसश्च यनीत्यर्थः॥ विशेषणोभयपदो यथा॥ शीतं च तदुष्णं चेति शीतोष्णं शीतं च तन्नतीक्ष्णं चेति शीतनतीक्ष्णं
विशेषणं विशेष्येण बहुलमिति समासः॥ उपमानपूर्व्वपदो यथा॥ शंख इव पाण्डुरः शंखपाण्डुरः शस्त्रीव श्या

मा शस्त्रीश्यामा कनकमिव गौरः कनकगौरः हंस इव श्रेणी हंसश्रेणी उपमानानि सामान्यवचनैरिति समासः। व
र्णादनुदात्तोपधात्तो न इति ङीष् नकारस्य नकारः॥ उपमानोत्तरपदो यथा॥ पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः नरोऽयं
सिंह इव नरसिंहः उपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति समासः॥ ॥संभावनापूर्व्वपदो यथा॥ गुणा इति
बुद्धिः गुणबुद्धिः पुत्र इव ग्रहणं पुत्रग्रहणं विशेषणं विशेष्येण बहुलमिति समासः॥ अवधारणापूर्व्वपदो यथा॥
गुणा एव धनं गुणधनं सुहृदेव बन्धुः सुहृद्बन्धुः विशेषणं विशेष्येण बहुलमिति समासः॥ मयूरव्यंसकादयश्चेति
समासो वा कतमः सप्तधा बहुव्रीहिः॥ द्विपदो बहुपदः संख्योत्तरपदः संख्योभयपदः सहपूर्व्वपदः व्यतीहारलक्ष

णः दिगन्तरालिलक्षणश्चेति॥ तत्र द्विपदो बहुव्रीहिर्यथा सर्व्वेषु विभक्त्यर्थेषु बहुव्रीहिर्वक्तव्यः प्रथमार्थं वर्ज्जयि
त्वा क्रमेण द्वितीयादीनां तदुदाहरणं दर्शयति॥ आरूढो वानरो यं वृक्षं स भवत्यारूढवानरो वृक्षः निर्जितः कामो
येन महेश्वरेण स निर्जितकामो महेश्वरः उपनीतं भोजनं यस्मै ब्राह्मणाय स उपनीतभोजनो ब्राह्मणः निःक्रान्तो २०
जनो यस्मात् स निःक्रान्तजनो ग्रामः शान्तः पुरुषो यस्य ग्रामस्य स शान्तपुरुषको ग्रामः उषितो विहगो यस्मिन् द्रुमे स उषित
विहगो द्रुमः शेषो बहुव्रीहिरित्यधिकृत्य अनेकमन्यपदार्थे इति समासः क्रमपादविक्षेपे निश्च पूर्व्वः निष्ठा अनुनासिः

कस्यचित्कलोः कितीनि दीर्घः॥ बहुपदो यथा॥ पराक्रमेणोपार्जिताः संपदो यैर्म्महापुरुषैः ते पराक्रमोपार्जितसंपदो
महापुरुषाः अनेकमन्यपदार्थे इति समासः॥ संख्यान्तरपदो यथा॥ समीपे दशानां इमे पुरुषा उपदशाः विंशते समीपे
वर्त्तन्ते इमे पुरुषा उपविंशाः संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये इति समासः बहुव्रीहौ संख्येये डच् बहुग
णादिति डच् समासान्तः॥ संख्योभयपदो यथा॥ द्वौ वा त्रयो वा द्वित्राः त्रयो वा चत्वारो वा त्रिचतुराः चतुरस्त्र्यपात्यात्सुप
संख्यानमित्यसमासान्तः संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये इति समासः बहुव्रीहौ संख्येये डच् बहुगणा
दिति डच् समासान्तः उपसर्ज्जनं पूर्व्वमिति पूर्व्वनिपातः अनुबन्धलोपः टेरिति इकारलोपः कारलोपः॥ सह पूर्व्वप

देयथा॥ मूलेन सहोद्धृतस्तरुः समूलोद्धृतस्तरुः तेन सहेति तुल्ययोग इति समासः॥ वोपसर्जनस्येति सहशब्दस्य स
कारः॥ व्यतीहारलक्षणो यथा॥ केशेषु केशेषु गृहीत्वा इदं युद्धं वृत्तं केशाकेयुद्धं लगुडैश्च लगुडैः प्रहृत्य इदं युद्धं
वृत्तं लगुडालगुडि युद्धं किलाकिलि युद्धं॥ तत्र तेदमिति सरूप इति समासः अन्येषामपि दृश्यत इति पूर्वपदस्य २१
दीर्घत्वं इच् कर्मव्यतीहारे इति इच् समासान्तः यस्येति चेत्यकारलोपः तिष्ठद्गुप्रभृतीनि चेति तिष्ठद्गुपाठादव्ययः
त्वं तेनाव्ययादाप्सुप इति सुपो लुक॥ दिगन्तराललक्षणो यथा॥ पूर्वस्याश्च दक्षिणस्याश्च दिशोर्यदन्तरालं सेयं पूर्व
दक्षिणा दिक् दक्षिणस्याश्च पश्चिमायाश्च दिशोर्यदन्तरालं सेयं दक्षिणपश्चिमा दिक् पश्चिमायाश्च उत्तरस्याः

स्याश्च दिशोर्यदन्तरालं सेयं पश्चिमोत्तरा दिक् उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदंतरालं सेयं उत्तरपूर्वा दिक् कादिङ्नामन्यन्त
राल इति समासः सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्य इति पुंवद्भावः पूर्वपदस्य पुंवद्भावानुदयो निवृत्तिः॥ द्विगुः
रागाषितो द्विधेति कोर्थो द्विगुः समासो द्विधा विज्ञेयः एकवद्भावी अनेकवद्भावी चेति। तत्र एकवद्भावी यथा॥ त्रीणि
शृंगाणि समाहृतानि त्रिशृंगी पंचपूलाः समाहृता इति पंचपूली दशमूली॥ तद्धितार्थोत्तरपदसमाहारे चेति समासः
संख्यापूर्वो द्विगुरिति द्विगुसंज्ञा द्विगुरेकवचनमित्येकवद्भावः स नपुंसकमिति पुंसकत्वे प्राप्ते अकारान्तोत्तर
पदो द्विगुः स्त्रियां भाष्यान इति स्त्रीत्वं द्विगोरिति ङीप॥ अनेकवद्भावी यथा॥ पंचपूली च पंचपूली च पंचपूली

चपंचपूल्याः चतस्रो दिशः चतुर्दिशः त्रयो लोकाः त्रिलोकाः दिक्संख्ये संज्ञायामिति समासः त्रिचतुरोस्त्रियां तिसृचतसृ
पू इति चतसृ आदेशः सरूपाणामेकशेष एकविभक्तौ इत्येकशेषः ॥ द्वन्द्वस्य तु चतुर्विधो ज्ञेय इति कोर्थः द्वन्द्वसमासश्च
द्वि तुर्विधो भवति समुच्चयो न्वाचय इतरेतरयोगः समाहारश्चेति ॥ तत्र समुच्चयान्वाचययोरसामर्थ्यान्न समासो २२
भवति समनुः पदविधिरिति वचनात् ॥ समुच्चये यथा ॥ भिक्षामट गां चानय यदि भिक्षाटने गां लप्स्यसि तदानाम
यानयिष्यसि ॥ समुच्चये यथा ॥ गामश्वं पुरुषं पशुमहरहर्नयमानो वैवस्वतस्तृप्तिं न याति ॥ इतरेतरयोः
गो यथा ॥ देवदत्तश्च यज्ञदत्तश्च देवदत्तयज्ञदत्तौ धवश्च पलाशश्च खदिरश्च धवखदिरपलाशाः ब्राह्मणश्च

क्षत्रियश्च वैश्यश्च शूद्रश्च ब्राह्मणक्षत्रियवैश्यशूद्राः वर्णानामानुपूर्व्येण पूर्वनिपातोऽल्पस्वरः चार्थे द्वन्द्व इति द्वन्द्वस
मासः ॥ समाहारो यथा ॥ शंखश्च पटहश्च शंखपटहं भेरी च मृदंगश्च भेरीमृदंगं करश्च तालश्च करतालं पाणिश्च पा
दश्च पाणिपादं शिरश्च ग्रीवा च शिरोग्रीवं वा कुब्जश्च जंघा च वा कुब्जजंघं हस्ती च अश्वश्च रत्नश्च रथश्च तुरगश्च रथतु
रगं चार्थे द्वन्द्व इति द्वंद्वसमासः द्वन्द्वः प्राणितूर्यसेनांगानां प्राण्यंगानां तूर्यांगां सेनांगानां द्वंद्व एकवत्स्यात् अत्रं गश
ब्दः प्रत्येकमभिसंबन्नपुंसकमिति नपुंसकलिंगता अत्र नो ह्रस्व इति सोरमभावः भावः मोनुस्वारः ॥ अव्ययीभावो
द्विधा मत इति कोर्थः अव्ययीभावसमासो द्विधा विज्ञेयः नामपूर्वपदः अव्ययपूर्वपदश्चेति तत्र नामपूर्वपदो यः

ध
त्रि

था शाकस्य मात्रा शाकप्रति पटोलस्य मात्रा पटोलप्रति सुप्प्रति ना मात्रार्थ इति समासः ॥ अव्ययीभावश्चेत्यव्ययसंज्ञा अव्य
यादाप्सुप इति सुपो लुक् ॥ अव्ययपूर्व्वपदो यथा ॥ कुंभस्य समीपे वर्त्तते इति उपकुंभं उपनगरं उपपर्व्वतं अव्ययं विभ:
क्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तर:
वचनेष्विति समासः ॥ अव्ययादाप्सुप इति सुपो लुकि प्राप्ते नाव्ययीभावातोऽम्त्वपंचम्याः इत्यमादेशः ॥ उपसर्ज्जनं पूर्व्वं:
मित्युपशब्दस्य पूर्व्वनिपातः ॥ ये ये वृद्धाः यथावृद्धं यथाऽसादृश्य इति समासः ॥ तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्
व्विधमिति कोऽर्थः ॥ पूर्व्वपदार्थप्रधान उत्तरपदार्थप्रधान उभयपदार्थप्रधानोऽन्यपदार्थप्रधानश्चेति तत्र पूर्व्वपदा: २३

२।२

र्थप्रधानो यथा पूर्व्वं कायस्य पूर्व्वकायः ॥ अपरं कायस्य अपरकायः अधरं कायस्य अधरकायः ॥ उत्तरं कायस्य उत्तरकाय
:पूर्व्वापराधरोत्तरमेकदेशिनैकाधिकरणे इति समासः ॥ उत्तरपदार्थप्रधानो यथा कष्टं श्रितः कष्टश्रितः ॥ कान्तार:
मतीतः कान्तारातीतः ॥ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति समासः ॥ उभयपदार्थप्रधानो देवदत्तश्च:
यज्ञदत्तश्च देवदत्तयज्ञदत्तौ ॥ चार्थे द्वन्द्व इति द्वन्द्वसमासः ॥ अन्यपदार्थप्रधानो यथा चित्रा गौर्यस्य स चित्रगुः ॥ अनेकमन्य
पदार्थ इति समासः ॥ गोस्त्रियोरुपसर्ज्जनस्येति ह्रस्वत्वं ॥ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामः
पूरणीप्रियादिष्विति चित्राशब्दस्य ह्रस्वत्वं ॥ कर्म्मधारयो द्विप्रधानः पूर्व्वपदार्थप्रधान उत्तरपदार्थप्रधानश्चेति तत्र पू

प
ष्ण

र्व्वपदार्थप्रधानो यथा नीलं च तदुत्पलं चेति नीलोत्पलं श्वेतोत्पलं रक्तोत्पलं विशेषणं विशेष्येण बहुलमिति समासः ॥ उ
त्तरपदार्थप्रधानो यथा ॥ पुरुषोयं व्याघ्र इव पुरुषव्याघ्रः पुरुषवृषभः नरसिंहः उपमितं व्याघ्रादिभिः सामान्याप्रयो
ग इति समासः ॥ बहुव्रीहिरपि पुनर्द्विप्रधान एव अन्यपदार्थप्रधान उत उभयपदार्थप्रधानश्चेति तत्र उभयपदप्रधा ॥ २४
नो यथा ॥ द्वौ वा त्रयो वा द्वित्राः संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये इति समासः ॥ बहुव्रीहौ संख्येये डज्बहुगणा
दिति डच् समासान्तः अन्यपदार्थप्रधानो यथा ॥ चित्रा गावो यस्य स भवति चित्रगुः अनेकमन्यपदार्थे इति समासः ॥ गोस्त्रियोः
रुपसर्जनस्येति ह्रस्वत्वं ॥ द्विगुरुभयपदार्थप्रधान एव यथा त्रिणी शृंगाणि समाहृतानि त्रिशृंगी तद्धितार्थोत्तर

पदसमाहारे चेति समासः ॥ द्वन्द्वः सर्वपदार्थप्रधान एव यथा ब्राह्मणश्च क्षत्रियश्च विट् च शूद्रश्च ब्राह्मणक्षत्रिय
विट्शूद्राः चार्थे द्वन्द्व इति द्वन्द्वसमासः ॥ अव्ययीभावस्त्रिप्रधान एव पूर्वपदार्थप्रधान उत्तरपदार्थप्रधानश्चा
न्यपदार्थप्रधानश्चेति तत्र पूर्वपदार्थप्रधानो यथा कुंभस्य समीपे यथा उन्मत्ता गंगा यस्मिन् तदुन्मत्तगंगं अन्यपदा
र्थे च संज्ञायामिति समासः स्त्रियाः पुंवदित्यादिना पूर्वपदस्य ह्रस्वत्वं अव्ययीभावश्चेति नपुंसकत्वात् ह्रस्वो नपुंसके
प्रातिपदिकस्येति ह्रस्वत्वं अव्ययीभावश्चेति अव्ययीभावसंज्ञा अव्ययादप्सुप इति लुकि प्राप्ते नाव्ययीभावादतोम्
त्वपंचम्या इत्यमुभावः ॥ इति प्रयोगमुखे समासपटलः समाप्तः ॥ ॥ समासपटलमभिधाय संप्रति तद्धितपट
लमनुवर्णयिष्यामः ॥ सामान्यावृत्यभावाख्यास्त्रिविधस्तद्धितो मत इति कोर्थः तद्धितस्त्रिविधो ज्ञेयः सामान्यवृत्तिः

अव्ययसंज्ञकः भाववाचकश्चेति। पदानामनुसमर्पणात् प्रथमाद्वा प्रत्ययन इति कोऽर्थः अनेकपदानां परस्परसमर्था
नां प्रथमादेव पदात् तद्धितप्रत्ययः प्रत्ययेन उत्पद्यते वा शब्दोऽवधारणार्थः सामान्यवृत्तिस्तावदुच्यते मत्वर्थे ल
प च् इलच् शं नं इनच् उरच् रं वं वलच् इणि वनं विनिं युसं ग्मिनिं आलिच् आटच् इलच् आरकनं अलुच् उच्
ह अणु वुनं खञं अश्नं इत्र फकपत्र टकं ईरकं दुकं आरकं घखं न्यं यनं इतचं अनङ् चुंचुपं चणं पं इष्ठनं इयसु २५
नं तरपं तमपं कल्पपं देश्यं देशीयरं जातीयरं द्वयसचं दघ्नञं मात्रचं तयपं ठञं एते पंचपंचाशत् सामान्यवृत्ते
य तद्धितप्रत्ययाः॥ मतुप्प्रत्ययः यथा गुणा यस्याः स्त्रियः यस्मिन् वा विद्यन्ते स गुणवान् धनवान् विद्यावान् शीलवान् तदस्यास्त्य
स्मिन्निति मतुप्प्रत्ययः उकारः सुखार्थः उकार उगित्कार्यार्थः। उगिदचामिति नुम् अनुबन्धलोपः संयोगः सुलोपन

